International Journal of Sanskrit Research 2021; 7(1): 515-518

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 515-518
© 2021 IJSR
www.anantaajournal.com
Received: 15-11-2020
Accepted: 28-12-2020

**Dr. Giridhari Panda**
Assistant Professor, Department of Sanskrit (UG & PG), Midnapore College (Autonomous), Midnapore, West Bengal, India

**Corresponding Author:**
**Dr. Giridhari Panda**
Assistant Professor, Department of Sanskrit (UG & PG), Midnapore College (Autonomous), Midnapore, West Bengal, India

# “सूत्रं व्याकरणमि" ति भाष्योक्तेः भाषावैज्ञानिकमध्ययनम्

**Dr. Giridhari Panda**

**सारांश**
त्रिमुनिव्याकरणे प्रसिद्धं प्रतीतं च महाभाष्यं सर्वातिशायीति प्रमाणान्तरं नापेक्ष्यते। भाष्ये सूत्रवार्तिकयोः अनस्वीतं तात्पर्यं च विभिन्नेन कौशलेन विचारितं विद्यते। पाणिनीयं सूत्रं वर्णेनापि आनर्थक्यं न भजते इति धिया भाष्यकृता यत्नः सर्वथा आधेयः। सूत्रतात्पर्यप्रदर्शनपुरःसरं तेषां प्रकाशन प्रत्याख्यानम् आशयप्रतिपादनञ्च साध्यते। परस्परं विरोधं विधाय भाषाशास्त्रीयदृष्ट्या प्रयोगसाधुत्वमिष्टं जायते तत्रत्यं लक्ष्यम् । वार्तिकाक्षेपस्य निराकरणम्. वार्त्तिकाक्षेपस्य समर्थनम् सूत्राशयवर्णनम्, सूत्राणां प्रत्याख्यानम् नूतनतया प्रयोगसाधनम्-इत्येवंभावेन तंत्रावलम्बिता भाषादृष्ट्या विषयदृष्ट्या विवेचनदृष्ट्या सूत्रवार्तिकपल्लवनदृष्ट्या च भाष्योपदिष्टा अभिनवा शैली अनविदिता एव, यस्याः भाषावैज्ञानिकदृष्ट्या याथार्थ्यं सर्वथाSSनस्वीकार्यम् । सूत्रे अल्पाक्षरेण समन्वितेन पदेन बहुविधस्य तात्पर्यस्य उपस्थापनं कर्तव्यं जायते इति सूत्रलक्षणात् तस्मात् प्रतिपाद्यते । पाणिनीयोपक्रमे यानि सूत्राणि वार्तिकवचनानि सन्ति संघटितानि, तेषामेव व्याख्याने आशयसाधने च भाष्यं सर्वथा उद्दिष्टम्। विवेचनातः प्रतिभाति त्रिमुनिसम्प्रदायें सूत्रवार्तिकभाष्यस्य उपपादनमस्मिन् तात्पर्ये सर्वथा उपपादितम्। तद्विरचितं भाष्यं पातञ्जलमहाभाष्यनाम्ना प्रायतः 85 इति आह्निकमाध्यमेन उपस्थापितं विद्यते। तत्र पस्पशाह्निके भाष्यकृताः[1] व्याकरणमित्यस्य शब्दस्य कः पदार्थः इति आशंक्य उपस्थापितं सूत्रं व्याकरणमिति। तस्मात् सूत्रस्य शास्त्रीयं स्वरूपं व्याकरणमिति शब्दशास्त्रस्य तात्पर्यात् धायते। सूत्रस्य व्याकरणत्वसाधने वार्त्तिकानामुपस्थापनपुरःसरं यः विचारः साधितः तदत्र भाषावैज्ञानिकदृष्ट्या प्रस्तूयते ।

**कूट शब्द**: सूत्रम्, व्याकरणम्, भाषाविज्ञानम्, भाष्यम्, शास्त्रीयरहस्यम्, संज्ञासूत्रम्

## प्रस्तावना

प्रवहन्त्याः भाषायाः विकसनं संकोचनं विलोपनमित्यादीनि प्रक्रियात्मकानि कार्याणि सरितां शय्यावदाकल्यन्ते । कस्मिंश्चिदुपाये अवसरे वा इमानि कार्याणि प्रकल्पन्ते प्रवर्तन्ते च अन्यथा तन्निर्णेतुम् अववोधयितुं प्रयोक्तुं वा न शक्यते। अतएव एकस्मिन् अनुशासने बन्धने नियमेन तस्याः किल भाषायाः परीक्षणमपेक्ष्यते यत् खलु शब्दमर्य्यादया शब्दानुशासनमिति व्यवहारं लभते । शब्दानुशासने व्याकरणे वा प्रतिपादितायामेतस्यां विचारधारायां यत् अलौकिकम् अनन्यम् अनुपमम् उपायं साधयति, स्वल्पीयसा आयासेन अल्पीयसा कालेन च याथार्थ्यं प्रतिपादयति ।

---

[1]. अयं व्याकरणमिति शब्दस्य कः पदार्थः सूत्रम्-म.भा. पस्पशा.

व्याकरणपरिभाषायां तत् 'सुत्रम्' इति पदेनाभिधीयते, येन माध्यमेन शब्दानुशासनं व्याकरणं वा पूर्णाङ्गं लभते तत्र शब्दानुशासने अवलम्बितं सर्वं वैज्ञानिकं सूत्रमाध्यमेनैव परिष्कृतं जायते।

'सूत्रम्' इति पदस्योपादनं सर्वथा लध्वर्थं हि उद्देश्यम् । एतस्मिन् विधौ पदानां प्रयोगार्हभूतानां च कृते एकं संघटनं सजातीयतामादाय संस्थाप्यते तत्र प्रयोगविज्ञाने स्वरूपं विचार्य समानतायां क्रियायाः अवलम्बनं विधीयते शब्दस्य मूलप्रकृतौ कस्मिन् भागे विकाशः विकार: विश्लेषणं वा अवधार्यते तत् विचार्य सम्पंद्यमानायां क्रियायां समानता अवलम्ब्यते एवं च किमात्मकं कार्यं तस्य स्वरूपं वा इति विचारपुरःसरं कार्यविधानं साधनं वा निरूप्यते उपदिश्यते च। तत्र पुनः शब्दानुशासने शब्दोपपादनप्रसङ्गे च शब्दोपदेशे प्रकृतिनिर्देशे च संक्षिप्तानुशीलनेन सर्वथा अवधार्यते। इदं तत्र अवधेयं यत् समानरूपस्य क्रियमाणस्य कार्यस्य कृते यत्र व्यतिक्रमः लक्ष्यते तदेवोपस्थाप्यते। किमात्मकस्य व्यतिक्रमः, तदपि अवधार्यते। कार्ये कुत्र निषेधः, कुत्र विकल्पः कुत्र वा उभयविध इति सर्वं निर्दिश्यते। सूत्रे अल्पाक्षरेण समन्वितेन पदेन बहुविधस्य तात्पर्यस्य उपस्थापनं कर्तव्यं जायते इति सूत्रलक्षणात् तस्मात् प्रतिपाद्यते ।

भाष्यकार: पतञ्जलिः त्रिमुनिव्याकरणे प्रामाणिक आचार्यः । पाणिनीयोपक्रमे यानि सूत्राणि वार्तिकवचनानि सन्ति संघटितानि, तेषामेव व्याख्याने आशयसाधने च भाष्यं सर्वथा उद्दिष्टम्। विवेचनातः प्रतिभाति त्रिमुनिसम्प्रदायें सूत्रवार्तिकभाष्यस्य उपपादनमस्मिन् तात्पर्ये सर्वथा उपपादितम्। तद्विरचितं भाष्यं पातञ्जलमहाभाष्यनाम्ना प्रायतः 85 इति आह्निकमाध्यमेन उपस्थापितं विद्यते। तच्च भाष्यं लक्षणदिशा इत्थमेवावजायते यत् –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।

अत्रेदमेव तात्पर्यं यत् सूत्रतात्पर्यप्रदर्शनपुरःसरं तेषां प्रकाशन प्रत्याख्यानम् आशयप्रतिपादनञ्च साध्यते। परस्परं विरोधं विधाय भाषाशास्त्रीयदृष्ट्या प्रयोगसाधुत्वमिष्टं जायते तत्रत्यं लक्ष्यम् । भाषावैज्ञानिकदृष्ट्या भाष्यकृता आशयस्य षड्भि उपायैः प्रतिपादनं कर्तुं शक्यते -

1. वार्तिकाक्षेपस्य निराकरणम्
2. वार्त्तिकाक्षेपस्य समर्थनम्
3. सूत्राशयवर्ण्यनम्
4. सूत्राणां प्रत्याख्यानम्
5. नूतनतया प्रयोगसाधनम्
6. सूत्रोपरि इष्टिनाम्ना नूतनस्य तथ्यस्याविष्करणम्

भाष्ये सूत्रवार्तिकयोः अनस्वीतं रहस्यं तात्पर्यं च विभिन्नेन कौशलेन विचारितं विद्यते। पाणिनीयं सूत्रं वर्णेनापि आनर्थक्यं न भजते इति धिया भाष्यकृता यत्नः सर्वथा आधेयः। अतः त्रिमुनिव्याकरणे प्रसिद्धं प्रतीतं च महाभाष्यं सर्वातिशायीति प्रमाणान्तरं नापेक्ष्यते। तत्रावलम्बिता भाष्यशैली भाषादृष्ट्या विषयदृष्ट्या विवेचनदृष्ट्या सूत्रवार्तिकपल्लवनदृष्ट्या व भाष्योपदिष्टा अभिनवा शैली अनविदिता एवं यस्याः भाषावैज्ञानिकदृष्ट्या याथार्थं सर्वथाSSनस्वीकार्यम्। पस्पशाह्निके सूत्रस्य व्याकरणत्वसाधने वार्त्तिकानामुपस्थापनपुरःसरं यः विचारः साधितः, तदत्र भाषावैज्ञानिकदृष्ट्या प्रस्तूयते।

भाष्यकृताः [2] व्याकरणमित्यस्य शब्दस्य कः पदार्थः इति आशंक्य उपस्थापितं सूत्रं व्याकरणमिति। तस्मात् सूत्रस्य शास्त्रीयं स्वरूपं व्याकरणमिति शब्दशास्त्रस्य तात्पर्यात् धायते। अस्मिन् पक्षे आक्षेपः विहितः- "सूत्रे व्याकरणे षष्ठ्यर्थाऽनुपपन्नः"। सूत्रं व्याकरणं चेत् उभयोः अभेदसाम्बन्धत्वात् षष्ठीविभक्तिः नोपपद्येत तस्याः विभक्तेः भेदकल्पकत्वात्। पुनश्च व्याकरणात् शब्दानां प्रतिपत्तिः जायते। न तु सूत्रात् । अत एवं शब्दो व्याकरणमिति अपरः तत्रापि अनुपपत्तिः आक्षेपद्वारा व्युत्पादित्ता ।

1. शब्दल्युडर्थः [3]।
2. भवेत् च तद्धितः ।
3. प्रोक्तादयश्च तद्धिताः [4]।

शब्द व्याकरणं चेत् ल्युडर्थनोपपद्यते, व्याक्रियते शब्दा अनेन इति व्याकरणं न हि शब्देन किंचित् व्याक्रियन्ते । एवं च व्याकरणे भव योगवैयाकरण न तु शब्दे भव इति। अपरं च पाणिनिना प्रोक्तं पाणिनीयं तत् सूत्रं भवितुमर्हति न हि पाणिनिना शब्दा प्रोक्ताः सिद्धान्ततया भाष्ये उपपादितं "लक्ष्यलक्षणं व्याकरणमिति" [5] । लक्ष्यं च लक्षणं च एततसमुदितमेतत् व्याकरणमिति।

किं पुनः लक्ष्यम् ? किं वा लक्षणम् । शब्दः लक्ष्यः सूत्र लक्षणम् । एतस्मात् अवधीयते सूत्रमपि व्याकरणं भवितुमर्हति । किन्तु समुदितेन शब्देन न सह । केवलं सूत्रं व्याकरणमिति उक्ते सति न किमपि दूषणं जायतात् । भाष्ये एतत् समाहितं दृश्यते। तथाहि- "ननु" [6] चोक्तम् सूत्रे

---

[2]. अयं व्याकरणमिति शब्दस्य कः पदार्थः सूत्रम्-म.भा. पस्पशा.

[3]. म.भा. पस्पशा. पृ.41, भा. 1.6.

[4]. म.भा. पस्पशा. पृ.43, भा. 1.6.

[5]. म.भा. पस्पशा पृ. 79, भा.1.6

[6]. म.भा. पृ. 79-80. भा.-1.6.

व्याकरणे षष्ठ्यर्थानुपपन्नः इति । नैष दोषः । व्यपदेशिवद्धात्वैन भविष्यति ।
यद्यप्युच्यते- शब्दप्रतिपत्तिः इति। न हि सूत्रतं एवं शब्दान् प्रतिपाद्यन्ते किं तर्हि ? व्याख्यानतश्च इति।
परिहृतमेतत् । तदेव सूत्रं विगृहीतं व्याख्यानं भविष्यति। प्रदीपकृता[7] । तदेव व्याख्यातं सूत्रशब्देन तु समूदायरूपता इति नागेशेन उद्योते शब्दोः शिर इति उदाहरणमुपस्थाप्य षष्ठ्यार्थेपपत्तिः भवितुमर्हति इति प्रातिपदितवान्। तथाहि उक्तम्- "सूत्रशब्देन"[8] तु समुदायरूपता इति। अनेकावस्थायुक्तस्य तस्य व्यक्तिक्रियाकरणावस्था विशिष्टावयव इति तद्रूपावयवार्य समुदाय इत्यर्थः
भाष्यकारः एकदेशेऽपि समुदायस्य व्यवहारं साधितवान् । अत एव लक्ष्यलक्षणे व्याकरणमिति वचने एकदेशस्य लक्षणस्य इत्यस्य व्याकरण इति भवितुर्हति । तथाहि समुदाये हि शब्दा प्रकृत्तावयवेषु अपि वर्त्तन्ते इति । अत एव सूत्रं व्याकरणमित्यपि भवितुमर्हति ।
सूत्रस्य शास्त्रीयस्वरूपं व्याकरणमित्युक्तौ न काचित् विप्रतिपत्तिः । व्याकरणपदार्थस्य अववोधनमन्यत् किमपि न । परन्तु सूत्रमेव वार्त्तिकं भाष्यमेतद्विधं यत् किमपि व्याख्यानं तत्सूत्रोपरि आधारितं, पदसाधुत्वविधानार्थ तदेव उपपन्नम्। अतः विचारेण सूत्रस्य शास्त्रीयस्वरूपं व्याकरणमिति भाष्यकृतमुपपादनमादाय प्रतिपाद्यते।
अष्टाध्याय्याः सूत्रप्रकारं विशदीकर्त्तुं गत्वा आकल्यते तानि सर्वाणि सूत्राणि संज्ञा, भाषा, विधि, नियमः, अतिदेशः, अधीकारक्षेति भावेन अवहितानि जायन्ते एतद्विभाजनं केवलं सूत्राणां कार्यप्रकारमादाय विश्रुतम्। तदेव “सूत्रस्य” इत्यस्य पारिभाषिकं स्वरूपम्।
संज्ञासूत्रे संज्ञा इति अन्वर्थसंज्ञामादाय प्रतिपन्नं व्युत्पत्या कर्मसाधनं, करणसाधनं, भावसाधनं चेति। अस्य शब्दस्य एतत्तात्पर्यं कैयट[9]- नागेशौ[10] स्वीकुरुतः व्याख्यातारः तदेव साधयन्ति। सम्यक्ज्ञान-संज्ञा, सम्यक् ज्ञायते संज्ञा संज्ञायते अनया इति संज्ञा इति अर्थदृष्ट्या संज्ञा इति द्विविधः। अवयवानुसारी, अवयवार्थानुसारी च, तदुक्तं न्यासकृता[11] संज्ञाशब्दो हि द्विविधो भवति। केचित् अवयवार्थानुगता यथा- सप्तपर्ण । केचित् तु विपरीता। यथा- तैलपायि इति।
प्राचीनाः आचार्या समुदायोपाधिसंज्ञा इति विचारयन्ति। विट्ठनाचार्येण[12] प्रतिपादितसंज्ञा समुदायापाधित्वेन नित्यसमासः । अयं न हि वाक्येन संज्ञा गम्यते इति। न्यासकृता प्रतिपादित ननु प्रतिभू इति संज्ञा इयं तत्र। किमन्तरग्रहणेन संज्ञायामिति वक्तव्यम् । न[13] एतत् द्रव्यता संज्ञा-शब्दः भवति। प्रसादटीकाया वालमनारमायां च विचारितमस्ति[14] एकद्रव्यनिवेशिन संज्ञाशब्दः इति । कैयटेन अवतपरिमाणं[15] संज्ञा इति उक्तम्। नागशेन[16] इत्यतानुपूर्वेकी संज्ञा इति उक्तम्।
न्यासकारोऽपि इत्यतानुपूर्विकी संज्ञा[17] भवति इति प्रतिपादितम्। पाणिनीयव्याकरणे सूत्रसंघटननोपायं पुरस्कृत्य संज्ञासूत्राणामुपपादनं लक्ष्यीक्रियते। यत्र भाष्यकारः प्रकारचतुष्टयमाविष्करोति ।
तथाहि-
१. यत्र तु अन्यतश्चघु यत् लघु सा संज्ञा ।
२. अनाकृतिसंज्ञा आकृतिमन्त संज्ञिनः।
३. आवर्त्तिन्यः संज्ञा भवन्ति ।
४. पूर्वोच्चारिसंज्ञा परोच्चारिता संज्ञा।

प्रतिलक्षणसन्दर्भ अनेकविधमनुपपत्तिमासाद्य भाष्यकृता सिद्धान्तितं संज्ञाधिकारात् संज्ञा सिद्धिः । एवं प्रकारेण सूत्रस्य व्याकरणत्वमिति शास्त्रीयरहस्यमुरोरीकृत्य सूत्राणां रहस्यप्रतिपादनं सदा विधीयते इति भाष्यकारस्याशय इति दिक्।

**सहायकग्रन्थाः**


1. अष्टाध्यायीसूत्रपाठः, दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१० ।
2. लघुशब्देन्दुशेश्वर मिश्रविश्वनाथः पञ्चसन्ध्यन्तः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९९८ ।
3. वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः, बालमनोरमा तत्वबोधिनी टीका, मोतिलाल बनारसीदास, दिल्ली, २००५।
4. वैयाकरणमहाभाष्यम्, डा. आचार्यसुयुनः रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत, २००८


7. म.भा.- पृ.79
8. म.भा., पृ. 80.
9. म.भा.प्र. – 5.2. वा.
10. म.भा. 3.4.2.11
11. न्या. – 3.2.46
12. प्र. टि. 2.1.44
13. न्यासे – 3.2.79
14. प्र.-वा.म. – 6.3.38
15. प्र . 1.2.11
16. श.शे. वहुव्रीहिप्रकरण पृ. 115
17. न्यासे – 3.3.9

5. वैयाकरण महाभाष्यम्, मीमांसकयुधिष्ठिर, रामलाल कपूर दृष्ट, रेवलि, सोनीपत, २००८
6. वाक्यपदीयम् ब्रहलकाण्डम् श्री वामदेव आचार्य, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी, १९८७
7. महाभाष्यम्, सम्पादकः- श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नइ देल्ली, २००६
8. वैयाकरणसिद्धान्तकौमुदी, व्याख्याकार पं. रामचन्द्र झा चौखम्बा कृष्णदाम संस्कृत अकादमी, वाराणसी
9. काशिकावृत्तिः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी २२१००१
10. परमलघुमञ्जूषा, व्याख्याकारः सम्पादकश्च- डा जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी २२१००१।
11. वैयाकरणसिद्धान्तकौमुदी, व्याख्याकार गोपालदत्तपाण्डेय, चौखम्बा गदास संस्कृत अकादमी, वाराणसी २२१००१।